# Sri Garbharakshambika Stotram



श्रीमाधवी काननस्थे

गर्भरक्षाम्बिके पाहि भक्तं स्तुवन्तम् ॥

वापीतटे वामभागे
वामदेवस्य देवस्य देवी स्थिता त्वम् ।
मान्या वरेण्या वदान्या
पाहि गर्भस्थ जन्तून् तथा भक्तलोकान् ॥

श्रीमाधवी काननस्थे
गर्भरक्षाम्बिके पाहि भक्तं स्तुवन्तम् ॥

श्रीगर्भरक्षापुरे या
दिव्यसौन्दर्ययुक्ता सुमाङ्गल्यगात्री ।
धात्री जनित्री जनानां
दिव्यरूपां दयार्द्रां मनोज्ञां भजे ताम् ॥

श्रीमाधवी काननस्थे
गर्भरक्षाम्बिके पाहि भक्तं स्तुवन्तम् ॥

आषाढमासे सुपुण्ये
शुक्रवारे सुगन्धेन गन्धेन लिप्ता।
दिव्याम्बराकल्पवेषा
वाजपेयादि यागस्थ भक्तैः सुदृष्टा॥

श्रीमाधवी काननस्थे
गर्भरक्षाम्बिके पाहि भक्तं स्तुवन्तम्॥

ब्रह्मोत्सवे विप्रवीथ्यां
वाद्यघोषेण तुष्टां रथे सन्निविष्टाम्।
सर्वार्थदात्रीं भजेऽहं
देवबृन्दैरपीड्यां जगन्मातरं त्वाम्॥

श्रीमाधवी काननस्थे
गर्भरक्षाम्बिके पाहि भक्तं स्तुवन्तम्॥

śrīmādhavī kānanasthe
garbharakṣāmbike pāhi bhaktaṃ stuvantam ||

vāpītaṭe vāmebhāge
vāmadevasya devasya devī sthitā tvam |
mānyā vareṇyā vadānyā
pāhi garbhastha jantūn tathā bhaktalokān ||

śrīmādhavī kānanasthe
garbharakṣāmbike pāhi bhaktaṃ stuvantam ||

śrīgarbharakṣāpure yā
divyasaundaryayuktā sumāṅgalyagātrī |
dhātrī janitrī janānāṃ
divyarūpāṃ dayārdrāṃ manojnāṃ bhaje tām ||

śrīmādhavī kānanasthe
garbharakṣāmbike pāhi bhaktaṃ stuvantam ||

āṣāḍhamāse supuṇye
śukravāre sugandhena gandhena liptā |
divyāmbarākalpaveṣā
vājapeyādi yāgastha bhaktaiḥ sudṛṣṭā ||

śrīmādhavī kānanasthe
garbharakṣāmbike pāhi bhaktaṃ stuvantam ||

brahmotsave vipravīthyāṃ
vādyaghoṣeṇa tuṣṭāṃ rathe sanniviṣṭām |
sarvārthadātrīṃ bhaje.ahaṃ
devabṛndairapīḍyāṃ jaganmātaraṃ tvām ||

śrīmādhavī kānanasthe
garbharakṣāmbike pāhi bhaktaṃ stuvantam ||

|| वन्दे गुरुं शङ्करम् ||

www.kamakotimandali.com